# Master of Arts Examination, 2022

( 2nd Year, 4th Semester )

## SANSKRIT

## Course – XX/A

## ( Modern Sanskrit Literature )

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१. क) ऊनविंश-विंशशतकयोः कतिपया विश्रुतसंस्कृतलघुकथा अनुसृत्य एको नातिदीर्घः प्रबन्ध आलेखनीयः। 10

अथवा,

ख) आधुनिकसंस्कृतसाहित्ये हरिदाससिद्धान्तवागीशस्यावदानं पर्यालोच्यताम्। 10

२. क) वङ्गानुवादेन **साकं** श्लोकस्य व्याख्या संस्कृतभाषया देवनागरीलिप्या च कार्या। 5

कवित्वशक्तेर्घटनानुकुला
विद्योतते देवि सदा त्वदीया।

अथवा,

ख) विधात्रा लिखिता या तु ललाटेऽक्षरमालिका।
ज्योतिर्वित्तां विजानीयाद् योगनिर्मलचक्षुषा॥
— वाक्यस्यास्य गूढार्थः सरलसुरगिरा व्याख्यायताम्। 5

३. अधोलिखितेषु **प्रश्नत्रयस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। 2×3=6

क) 'सममेव राहुमुखादिव विकशितविशदकुसुमानि विलोक्य भयेनापगच्छति' — कस्मै वाक्यमिदं कथितम्? को व्यङ्ग्यार्थोऽत्र परिस्फुट्यते?

[ Turn over



ख) 'एतद् भवति यदा निकटवासिनी न हृदयनिवासिनी' — केन कथञ्चोक्तम्?

ग) 'यदि अस्य कृते न सिद्धः, तव कृते अहं यत्नेन रक्षिष्यामि' — वाक्यस्यास्य तात्पर्यमुल्लिख्यताम्।

घ) 'क्षीरान्विता मसीव आलोकमिश्रिता सन्ध्या स्वात्मानमजहात्' — का व्यञ्जनात्र निहितास्ति?

ङ) 'अक्ष्णोर्विभाता विभावरी' — निहितार्थः कः?

च) 'काव्यं स कारुण्यमयं परस्तात् काव्यीयरत्नाकरतां जगाम' — का कथात्र कविनोदाहृता?

४. श्रीजीवन्यायतीर्थस्य काव्यान्यवलम्ब्य उत क्षमाराओ-महोदयायाः रचनान्यनुसृत्य संस्कृतभाषया एको लघुनिबन्धो विरचनीयः। 5

५. अधोलिखितेषु **चतुर्णां** प्रश्नानामुत्तरं संक्षेपेण प्रदेयम् — 1×4=4

क) आनन्दवृन्दावनचम्पूः केन विरचिता? तत्र कियन्तः स्तवकाः सन्ति?

ख) को विद्याधरः? तत्रभवतो ग्रन्थस्य नाम किम्?

ग) भट्टमथुरानाथशास्त्रिणा प्रणीताया रसगङ्गाधरस्य टीकाया नाम लिख्यताम्। तत्रभवतोऽपरस्याः कस्या अपि एकस्याः कृतेरुल्लेखः कार्यः।

घ) ब्रह्मानन्दशर्मणः काव्यद्वयस्य नामनी लिख्येताम्।

ङ) नित्यानन्दस्मृतितीर्थेन अनूदितयोः द्वयोः रवीन्द्रनाट्ययोः नामनी समुल्लिख्येताम्।

च) कोकिलविलापः कया विरचितः? केन छन्दसा रचितमिदं विलापकाव्यम्?